श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

## श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे

# ॥ चत्वारिंशः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ चत्वारिंशः सर्गः ॥

## सुग्रीवरावणयोर्मल्लयुद्धम्

ततो रामः सुवेलाग्रं योजनद्वयमण्डलम्।
उपारोहत् ससुग्रीवो हरियूथैः समन्वितः॥ **6.40.1** ॥

स्थित्वा मुहूर्तं तत्रैव दिशो दश विलोकयन्।
त्रिकूटशिखरे रम्ये निर्मितां विश्वकर्मणा॥ **6.40.2** ॥

ददर्श लङ्कां सुन्यस्तां रम्यकाननशोभिताम्।
तस्य गोपुरशृङ्गस्थं राक्षसेन्द्रं दुरासदम्॥ **6.40.3** ॥

श्वेतचामरपर्यन्तं विजयच्छत्रशोभितम्।
रक्तचन्दनसंलिप्तं रत्नाभरणभूषितम्॥ **6.40.4** ॥

नीलजीमूतसङ्काशं हेमसञ्छादिताम्बरम्।
ऐरावतविषाणाग्रैरुत्कृष्टकिणवक्षसम्॥ **6.40.5** ॥

शशलोहितरागेण संवीतं रक्तवाससा।
सन्ध्यातपेन सञ्छन्नं मेघराशिमिवाम्बरे॥ **6.40.6** ॥

पश्यतां वानरेन्द्राणां राघवस्यापि पश्यतः।
दर्शनाद् राक्षसेन्द्रस्य सुग्रीवः सहसोत्थितः॥ **6.40.7** ॥

क्रोधवेगेन संयुक्तः सत्त्वेन च बलेन च।
अचलाग्रादथोत्थाय पुप्लवे गोपुरस्थले॥ **6.40.8** ॥

स्थित्वा मुहूर्तं सम्प्रेक्ष्य निर्भयेनान्तरात्मना।
तृणीकृत्य च तद् रक्षः सोऽब्रवीत् परुषं वचः॥ **6.40.9** ॥

लोकनाथस्य रामस्य सखा दासोऽस्मि राक्षस।
न मया मोक्ष्यसेऽद्य त्वं पार्थिवेन्द्रस्य तेजसा॥ **6.40.10** ॥

इत्युक्त्वा सहसोत्पत्य पुप्लुवे तस्य चोपरि।
आकृष्य मुकुटं चित्रं पातयामास तद् भुवि॥ **6.40.11** ॥

समीक्ष्य तूर्णमायान्तं बभाषे तं निशाचरः।
सुग्रीवस्त्वं परोक्षं मे हीनग्रीवो भविष्यसि॥ **6.40.12** ॥

इत्युक्त्वोत्थाय तं क्षिप्रं बाहुभ्यामाक्षिपत् तले।
कन्दुवत् स समुत्थाय बाहुभ्यामाक्षिपद्धरिः॥ **6.40.13** ॥

परस्परं स्वेदविदिग्धगात्रौ
    परस्परं शोणितरक्तदेहौ।
परस्परं श्लिष्टनिरुद्धचेष्टौ
    परस्परं शाल्मलिकिंशुकाविव॥ **6.40.14** ॥

मुष्टिप्रहारैश्च तलप्रहारै -
    ररत्निघातैश्च कराग्रघातैः।
तौ चक्रतुर्युद्धमसह्यरूपं
    महाबलौ राक्षसवानरेन्द्रौ॥ **6.40.15** ॥

कृत्वा नियुद्धं भृशमुग्रवेगौ
    कालं चिरं गोपुरवेदिमध्ये।

उत्क्षिप्य चोत्क्षिप्य विनम्य देहौ
　　पादक्रमाद् गोपुरवेदिलग्नौ ॥ **6.40.16** ॥

अन्योन्यमापीड्य विलग्नदेहौ
　　तौ पेततुः सालनिखातमध्ये।
उत्पेततुर्भूमितलं स्पृशन्तौ
　　स्थित्वा मुहूर्तं त्वभिनिःश्वसन्तौ ॥ **6.40.17** ॥

आलिङ्ग्य चालिङ्ग्य च बाहुयोक्त्रैः।
　　संयोजयामासतुराहवे तौ।
संरम्भशिक्षाबलसम्प्रयुक्तौ
　　सुचेरतुः सम्प्रति युद्धमार्गैः ॥ **6.40.18** ॥

शार्दूलसिंहाविव जातदंष्ट्रौ
　　गजेन्द्रपोताविव सम्प्रयुक्तौ।
संहत्य संवेद्य च तौ कराभ्यां
　　तौ पेततुर्वै युगपद् धरायाम् ॥ **6.40.19** ॥

उद्यम्य चान्योन्यमधिक्षिपन्तौ
　　सञ्चक्रमाते बहु युद्धमार्गे।
व्यायामशिक्षाबलसम्प्रयुक्तौ
　　क्लमं न तौ जग्मतुराशु वीरौ ॥ **6.40.20** ॥

बाहूत्तमैर्वारणवारणाभै -
　　र्निवारयन्तौ परवारणाभौ।
चिरेण कालेन भृशं प्रयुद्धौ
　　सञ्चेरतुर्मण्डलमार्गमाशु ॥ **6.40.21** ॥

तौ परस्परमासाद्य यत्तावन्योन्यसूदने।
मार्जाराविव भक्षार्थेऽवतस्थाते मुहर्मुहुः ॥ **6.40.22** ॥

मण्डलानि विचित्राणि स्थानानि विविधानि च।
गोमूत्रकाणि चित्राणि गतप्रत्यागतानि च॥ **6.40.23** ॥

तिरश्चीनगतान्येव तथा वक्रगतानि च।
परिमोक्षं प्रहाराणां वर्जनं परिधावनम्॥ **6.40.24** ॥

अभिद्रवणमाप्लावमवस्थानं सविग्रहम्।
परावृत्तमपावृत्तमपद्रुतमवप्लुतम्॥ **6.40.25** ॥

उपन्यस्तमपन्यस्तं युद्धमार्गविशारदौ।
तौ विचेरतुरन्योन्यं वानरेन्द्रश्च रावणः॥ **6.40.26** ॥

एतस्मिन्नन्तरे रक्षो मायाबलमथात्मनः।
आरब्धुमुपसम्पेदे ज्ञात्वा तं वानराधिपः॥ **6.40.27** ॥

उत्पपात तदाऽऽकाशं जितकाशी जितक्लमः।
रावणः स्थित एवात्र हरिराजेन वञ्चितः॥ **6.40.28** ॥

अथ हरिवरनाथः प्राप्तसङ्ग्रामकीर्ति -
निशिचरपतिमाजौ योजयित्वा श्रमेण।
गगनमतिविशालं लङ्घयित्वार्कसूनु -
र्हरिगणबलमध्ये रामपार्श्वं जगाम॥ **6.40.29** ॥

इति स सवितृसूनुस्तत्र तत् कर्म कृत्वा
पवनगतिरनीकं प्राविशत् सम्प्रहृष्टः।
रघुवरनृपसूनोर्वर्धयन् युद्धहर्षं
तरुमृगगणमुख्यैः पूज्यमानो हरीन्द्रः॥ **6.40.30** ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे चत्वारिंशः सर्गः॥